सिध्यति"भावप्र०। तादृशरोगयुक्तत्वात् दन्तरस्य तथात्वम्। "तप्तस्नेहे पचेत् पूर्वं वेसवारकसंज्ञकम्। पाकप्रापितसौरभ्यं करालं सूदकैर्मतम्"पाकशास्त्रोक्ते स्नेहपक्वे १०वेसवारे न०।(कडि)११कस्तूरीमृगे पुंस्त्री"एणहरिणर्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्राप्ृषतचारुष्कमृगमातृकाप्रभृततयो जङ्गलाः मृगाः कषया मधुरा लघवो वातपित्तहराःशीतला हृद्या वस्तिशोधनाश्च"सुश्रुते मृगभेदानुक्त्वा तद्गुणा उक्ताः। १२दैत्यभेदे पु०। "सङ्कमः कालवदनः करालः कौशिकः शरः" हरिवं४२ असुरनामकथने। "सङ्कमः-कालवदनः करालः केशिरेव च"हरिवं० २६२ अ०। स्वार्थे कन् करालकः उक्तार्थे कृष्णतुलस्याम् पुंरत्ना०।

**करालत्रिपुटा** स्त्री करालानि त्रीणि पुटान्यस्याः। लङ्काधान्ये त्रिकाण्डिकायाम् राजनि०।

**करालभैरव** न० तन्त्रभेदे। म०त० कूर्मपु० हिमालयं प्रति देवीवाक्यम्। "करालभैरवञ्चापि यामलं वाममाश्रितम्। एवंविधानि चान्यानि मोहनार्थानि यानि तु। मया सृष्टानि चान्यानि मोहायैषां भवार्णवे" [इच्चे हेमच०।

**करालिक** त्रि० कराणां करतुल्यशाखानामालियत्र कप्।

**करास्फोट** पु०करेण आस्फोटः शब्दो यत्र। वक्षःस्थले सङ्कुचितरूपेण स्थापिते एकबाहौ इतरकराघातेन ताड़ने (तालठोका)। ६त०। २कराघाते।

**करिक** पु० करो विक्षेपोऽस्त्यस्य ठन्। विट्खदिरे शब्दच०

**करिकणवल्ली** स्त्री करिकणः गजपिप्पल्यवयव इव वल्ली। चविकावृक्षे (चइ) राजनि०।

**करिका** स्त्री करोविलेखनमस्त्यस्याम् अर्श० अच् अत इत्त्वम्। नखरेखायाम् वैज०। [चूर्णे शब्दचि०

**करिकुसुम्भ** पु०करा नागकेशरस्तस्य कसुम्भइव। नागकेशर-

**करिज** पुंस्त्री करितोजायते जन—ड। हस्तिशिशौ शब्दरत्ना०

**करिणी** स्त्री करिन्+स्त्रियां ङीप्। १हस्तिन्याम् अमरः "त्रासावसन्नमदधारकपोलभागाः सम्पादयन्ति करिणः करणीभ्रमं नः" धनञ्जयविज०। २देवताभेदे शब्दचि०।

**करिदारक** पु०१करिणं दृणाति हिनस्ति दृ-ण्वुल्। सिंहे। शब्दर०स्त्रियां टाप् अत इत्त्वम्। [शब्दचि०

**करिनासिका** स्त्री करिणोनासेवाकारोऽस्याः। यन्त्रभेदे

**करिन्** पुंस्त्री करः शुण्डः प्राशस्त्येनास्त्यस्य इनि। हस्तिनि गजे "वृंहितं करिगर्जितम् अमरः 'मुक्ताफलाय करिणाम् हरिणं पलाय" व्या०उदा०। "अरिकरिहरणार्थं योजनानामशीत्या" लीला०। "करीव सिक्तं पृषतैः पयोमुचाम्" "कटप्रभेदेन करीव पार्थिवः"रघुः "आयामवद्भिः करिणां घटाशतैः"माघः। २अष्टसंख्यायाम् एकादिशब्दे विवृतिः। करिभेदादिकम् पृ० ९५९ इभशब्दे उक्तम्। तन्नामनामके ३नागकेशरे पु०।

**करिप** पु० करिणं पाति पा—क। हस्तिपके (माहुत)। चूर्णादि० अप्राणिवाचकषष्ठ्यन्तात् अस्याद्युदात्तता। वनकरिप इत्यादि। [राजनि०

**करिपत्र** न० करो तत्कर्ण इव पत्रमस्य। तालिपत्रवृक्षे

**करिपथ** पु० ६त०अच् समा०। हस्तिगमनयोग्ये पथि ततः संज्ञायां कन् देवपथादि०तस्य लुक्। करिपथनामके देशभेदे पु०। [पिप्पल्याम् अमरः

**करिपिप्पली** स्त्री करिपूर्व्वपदयुक्ता पिप्ली शा०त०। गज

**करिपोत** पु० ६त०। हस्तिशावके हारा०।

**करिबन्ध** पु० करिणं बध्नातत्र बन्ध-आधारे घञ्। १हस्तिबन्धस्तम्भे हारा०। भावे घञ् ६त०। २गजबन्धने च

**करिभ** न० करीव भाति भा—क। कुञ्जभेदे त्रिका०।

**करिमाचल** पुंस्त्री मच-शाठ्ये घञ् करिणि माचं शाठ्यं लाति ला-क। १सिंहे त्रिका० गजमाचलादयोऽप्यत्र स्त्रियां जातित्वात् ङीष्।

**करिमुख** पु० करिणोमुखं मुखमस्य। १गणेशे यथा चास्य गजवक्त्रता तथा इभाननशब्दे ९८१पृ०उक्तम्। ६त०। २गजस्य मुखे न०।

**करिर** पुंन० कृ—इरन्। गूढपत्रे उष्ट्रप्रिये मरुभूमिजे करीरे वृक्षभेदे। शब्दरत्ना०। करीरशब्दे गुणादि।

**करिरत** न० "भूगतस्तनभुजास्यमस्तकामुन्नतां स्वयमधोमुखीं स्त्रियम्। क्रामति स्वकरकृष्टमेहने वल्लभे करिरतं तदुच्यते" इत्युक्तलक्षणे १रतिबन्धभेदे शब्दचि० करिपदमिति पाठान्तरे"करिपदमित्यपि तत्रार्थे। ६त०२गजरमणे च।

**करिव** त्रि० करिणं वाति वा—क। करिगते अप्राणिषष्ठ्यन्तात्तस्य चूर्णा० आद्युदात्तता। वनकरिव इत्यादि

**करिशावक** पु० गजशिशौ "यावत्पञ्चाब्दमेतस्मिन् करभः कलभोऽपि च" शब्दर० उक्ते पञ्चाब्दपर्य्यन्ते हस्तिबालके।

**करिष्ठ** त्रि० अतिशयेन कर्त्ता इष्ठन् तृणोलोपः। कर्तृतमे "पुरू सखिभ्य आसुति करिष्ठः" ऋ०७,९७,७। ईयसुन्। करीयस् कर्तृतरे त्रि० स्त्रियां ङीप्।

**करिष्यमाण** त्रि०कृ—भविष्यति शानच् स्यट्। कर्त्तव्ये। वेदे तु नि० मानलोपः। "यानि करिष्या कृणुहि प्रवृद्ध!"